A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol - V,. Page-104-106 ISSN 976-8645

# संस्काराणां शैक्षिकं मनोवैज्ञानिकञ्च

जगदीशराज शर्मा

संस्कारा: एव भारतीयसंस्कृते: स्रोतांसि वर्तन्ते। अस्माकं संस्कृतसाहित्ये चत्वारा: वेदा:, उपनिषद्ग्रन्था:, संहिता ग्रन्था:, ब्राह्मणग्रन्था: आरण्यकग्रन्था: गृह्यसूत्रग्रन्था:, स्मृतिग्रन्था:, पुराणानि, उपपुराणानि, रामायणमहाभारतादिषु आर्षग्रन्थेषु संस्काराणामुल्लेखा: समुपलभ्यन्ते। अनेके मनीषिण: विद्वांसश्च संस्कृतसाहित्ये समुपलभ्यते। अनेके मनीषिण: विद्वांसश्च संस्कृतसाहित्ये संस्काराणां वर्णनं कृतवन्त:। प्रामुख्येन षोडश संस्कारा: भवन्ति। ते च १. गर्भाधानम् २. पुंसवनम् ३. सीमन्तोन्नयनम् ४. जातकर्म ५. नामकरणम् ६. निष्क्रमणम् ७. अन्नप्राशनम् ८. चूडाकर्म ९. कर्णवेध: १०. उपनयनम् ११. वेदारम्भ: १२. केशान्तम् १३. समावर्तनम् १४. पाणिग्रहणम् १५. व्रतसाध्यापनम् १६. अन्त्येष्टि:

अद्यापि भारतीयानां पुंसवन-सीमन्तोन्नयन-जातकर्म-कणवेध-उपनयन-वेदारम्भ-पाणिग्रहणादीनि प्रभृतय: संस्कारा: सर्वत्र भारते समानरुपेण अनुष्ठीयन्ते। आकाश्मीरत: कन्याकुमारीयावदिदमेवास्माकं ऐक्यस्य सूत्रम्।

यद्यपि कर्मकाण्डानुसारं संस्कारसम्पादनप्रक्रियायामन्तरं क्वचित् परिलक्षयते, तथापि एषामान्तरिकं वैशिष्ठयमेकरुपता च सर्वत्रभारते समानैव परिलक्ष्यते।

विश्वेऽस्मिन् भारतीयसंस्कृतेरलौकिकमतुलनाञ्च अवदानमस्ति। इमे संस्कारा: संस्कृत-संस्कृतेश्चामूल्या: निधिरुपा: सन्ति। यद्यपि एषां संस्काराणां वर्णनं भारतीयसंस्कृतवाङ्मये विशदरुपेण दृश्यते तथापि एषां शैक्षिकीं मनोवैज्ञानिकीम् अनुसन्धानात्मिकां च दृष्ट्या सूक्ष्मेक्षणम् अद्यापि केनापि विद्वद्वर्येण न विहितम्। एषामुपादेयता मनसोद्योत्यते। चेतनं मन:, अधचेतनमन:, अचेतन मन, मनश्च अतीव महत्त्वपूर्णमस्ति। संस्कृतग्रन्थेषु मनस: तुरीयावस्थाया अपि वर्णनं समुपलभ्यते परं पाश्चात्यै: मनोवैज्ञानिकै: अस्या: तुरीयावस्थाया: चित्रण न विहितम्।

पाश्चात्या: मनोवैज्ञानिका: यथा सिग्मण्ड फ्रायड, कोहलर, कोफका इत्यादय: शोधकर्ता: मानसिकं-इदं, अहं, परमोऽञ्च प्रभृतितत्त्वानां वर्णनं प्रामुख्येन विहितवन्त: सुसंस्कारा एभिरुपर्युक्तै: तत्वै: सामाजिकं समाजोपयोगिनं कर्तुं प्रभन्ति।

पुरुषस्य मनसो विकासावस्थासु शैशव-कौमार्य-किशोरादिषु एषामुपादेयता भूमिका च महत्त्वपूर्ण स्थानं विधन्ते। एभि: संस्कारै: व्यक्तित्वस्य सर्वाङ्गीणेविकासे शारीरिक, मानसिकम्, अध्यात्मिकं,

सामाजिकं, संवेगात्मकं, चारित्रिकञ्च महत्त्वपूर्णं योगदानं भवितुमर्हति।

गर्भाधानसंस्कारादनन्तरं शिक्षायाः सूक्ष्मक्रमोऽपि प्रारभते। यादृशे वातावरणे गर्भवती निवसति तादृशः एव प्रभावः बालकस्य सूक्ष्मे मनसि अङ्कितो भवति। जन्मादेव ते संस्काराः प्रस्फुटन्ति। अस्योल्लेखः महाभारते-अभिमन्यु सदृशानां बालकानां चरित्रस्यावलोकनेन ज्ञायते।

उपनयसंस्कारस्य शिक्षायाः सह घनिष्ठः सम्बन्ध आसीत्। यदा बालकः गुरोः समीपं विद्याग्रहणर्थं गच्छति तदा गुरुः तं सम्यक् परीक्ष्य स्वीकरोति स्म। अनन्तरम् उपनयनसंस्कारस्यानुष्ठानं कृत्वा गुरुः तस्मै विद्यां ददाति स्म। मन्त्रदीक्षायाः कार्यक्रमोऽपि भवति स्म।

वेदारम्भसंस्कारः गायत्रीमन्त्रेण गुरुः शिष्याय कारयति स्म। शनैः शनैः वेदानां, वेदाङ्गानाञ्च अध्ययनं प्रचलति स्म। अध्ययनस्य अवधिः द्वादशवर्षाणि यावत् प्रचलिता आसीत्। शिष्यः गुरुगृहे अन्तेवासीरुपेण निवसन् विद्याध्ययनं करोति स्म। गुरुगृहेनिवसन् बालकः गुरो आचारणादपि शिक्षाग्रहणे करोति स्म। गुरुः शिष्यपुत्रयोः कोऽपिभेदः न करोति स्म। अनेन वातावरणं सशक्तं भवति तथा बालकस्य शरीरिकं मानसिकमाध्यात्मिकं संवेगात्मकं चारित्रिकं व्यावहारिकञ्च विकासो भवति स्म।

प्राचीनभारतीयशिक्षायां पुरुषार्थचतुष्टयस्य धर्मः, अर्थः, कामः मोक्षश्स्य, प्रातिष्तटरेव शिक्षायाः प्रमुखमुद्देश्यं निर्धारितमासीत्। यस्य अद्यतनीयभारतीयम् एवं पाश्चात्यशिक्षायां चर्चा परिलक्ष्यते। इदं पुरुषार्थ चतुष्टयं सुव्यवस्थायै आत्मोद्धारस्य कृते स्तम्भरुपेण मन्यते। एषां चतुर्णां पुरुषार्थाना मूलः धर्मोऽस्ति। धर्मानुसारं अर्थोपार्जनं कामसेवनं भवितव्यम् तदनन्तरं मोक्षस्य परिकल्पना भवितव्या।

व्यक्तित्वस्य समत्वविकासे एषां संस्काराणाम् द्वितीयं योगदानं परिलक्ष्यते। आरम्भाद् गर्भाधानं-पुसवनं-सीमन्तोयन्न-जातकर्मादिना आन्तरिकं एवं वाह्यं व्यकितत्वं विकासमेति। बालकस्य सामाजिकं, नैतिकं व्यावहारिकं च व्यक्तित्वस्य विकासस्य इमे संस्काराः समधिकाः महत्त्वपूर्णाः भवन्ति। स सामाजिकेन ज्ञानेन सह व्यावहारिकं ज्ञानमपि प्राप्नोति। अद्यतनीयमनोवैज्ञानिकैरपि मनोविज्ञानस्य मानसिकी आत्मिकी चेतनकी परिकल्पनां विहाय, व्यावहारिकी परिकल्पना स्वीकृता। अधुनामनोविज्ञानं व्यवहारस्य विज्ञानम् इति मान्यता प्राप्ता संस्कारिताः युवापि उपर्युक्त गुणसम्पन्नोभूत्वा स्वकीयमेव राष्ट्रस्य उन्नतये अभिवृद्धयेश्च योगदाने सक्षमाः भवन्ति। समावर्तनकाले गुरुः शिष्यमुपदिशति स्म सत्यं वद। धर्मं चर। स्वाध्याय प्रवचनाभ्यां मा प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्य

देवो भव। अतिथि देवो भव।

इत्थं बालकाय कर्त्तव्यबोधस्य, कुटुम्बं प्रति स्वोत्तरदायित्वस्य, समाजस्य सुव्यव्सथायै गुहस्थाश्रमे प्रवेशाय कुशला व्यावहारिकी शिक्षा च दीयते स्म। एभिः संस्कारैः बालकस्य मानसिकविकासो भवति तता च आत्मबलमपि वर्धते। एषां संस्काराणां सांस्कृतिकं महत्त्वं प्रासङिगकता च आधनिकयुगेऽपि यथावदनुभूयते।

## सन्दर्भग्रन्थसूची


१. हिन्दु संस्कारः राजवली पाण्डेय।

२. संस्कृतिः रामधारी सिंह दिनकर।

३. धर्मग्रन्थों का इतिहास–पी.वी. काणे।

४. कर्मठगुरु।

५. ऋग्वेद।

६. तैत्तरीय संहिता।

७. तैत्तरीयोपनिषद।

८. मनुस्मृत्तिः।

९. याज्ञवल्कयस्मृतिः।

१०. संस्कृति संस्कृतम्–डॉ. राजेन प्रसाद।

११. शिक्षामनोविज्ञानम्–एस्–एस्–चौहान्।

१२. Singh A.K. Advance General Psychology.

१३. रामशकल पाण्डेय, शिक्षा मनोविज्ञान।

१४. माथुर–एस. एस–शिक्षा मनोविज्ञानम्।

१५. Educational Psychology-N.K. Dutta.